१३

अजन्तस्त्रीलिङ्गे रमानदीशब्दरूपाणि

प्रस्तावना

पूर्वम् अजन्तपुंलिङ्गप्रकरणं पठितम्। अधुना अजन्तस्त्रीलिङ्गप्रकरणं प्रारभ्यते। प्रातिपदिकशब्दाः च द्विविधाः इति पूर्वम् उक्तम्। १.अजन्तशब्दः२.हलन्तशब्दः इति तस्य भेदद्वयम्। येषां शब्दानाम् अन्ते अच् भवति ते अजन्ताः शब्दाः। येषां शब्दानाम् अन्ते हल् भवति ते हलन्ताः शब्दाः। तत्र लिङ्गभेदेन अजन्तशब्दाः हलन्तशब्दाश्च त्रिविधाः भवन्ति। तथाहि अजन्तपुंलिङ्गशब्दाः, अजन्तस्त्रीलिङ्गशब्दाः, अजन्तनपुंसकलिङ्गशब्दाः, हलन्तपुंलिङ्गशब्दाः, हलन्तस्त्रीलिङ्गशब्दाः, हलन्तनपुंसकलिङ्गशब्दाश्चेति। अस्मिन् पाठे अजन्तस्त्रीलिङ्गशब्दानां रूपसाधनप्रक्रियाम् आलोचयामः। स्त्रीलिङ्गवाचकशब्दाः द्विधा विभक्ताः। केचन शब्दाः पुंलिङ्गे विद्यन्ते। तेषु एव स्त्रीत्वविवक्षायां टाबादयः स्त्रीप्रत्ययाः भवन्ति। यथा रमा सर्वा इत्यादयः। अपरे केचन तु स्वतः एव स्त्रीलिङ्गवाचकाः, येषु कोऽपि विशेषप्रत्ययः न प्रयुज्यते। यथा लक्ष्मीः श्रीः मतिः इत्यादयः। स्त्रीप्रत्ययानां विचारस्तु स्त्रीप्रत्ययप्रकरणे विहितः। स्त्रीलिङ्गवाचकशब्दानां रूपाणि कथं भवन्ति इति विचाराय प्रकरणमिदं प्रारभ्यते।

उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- स्त्रीलिङ्गशब्दानां रूपाणि कथं भवन्ति इति ज्ञास्यति।
- अपृक्तसंज्ञां विस्तरेण ज्ञातुं शक्ष्यति।
- प्रत्ययलोपे अपि तदाश्रितानि कार्याणि कथं भवन्ति इति बोद्धुं समर्थः भविष्यति।
- रमाशब्दस्य रूपसाधनानि कर्तुं शक्तः भविष्यति।
- नदीसंज्ञाविषये विस्तरेण ज्ञास्यति।

।।रमा।।

आदौ रमाशब्दस्य रूपसाधनप्रक्रियाम् अवलोकयामः। रमाशब्दः टाप् इति स्त्रीप्रत्ययान्तः। रमते विष्णुना साकम् इत्यर्थे विद्यमानात् रमु क्रीडायाम् इति धातोः नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः इत्यनेन सूत्रेण पचादिगणपठितात् अच्प्रत्यये प्रक्रियाकार्ये रमशब्दः निष्पद्यते। ततः स्त्रीत्वविवक्षायां स्त्रियाम् इत्यधिकारे विद्यमानेन अजाद्यतष्टाप् इत्यनेन सूत्रेण टापि अनुबन्धलोपे रमा इति निष्पद्यते। रमा इति टाप्प्रत्ययान्तः। अप्रातिपदिकत्वेऽपि तस्मात् ङ्याप्प्रातिपदिकात् इत्यत्र ङ्यापोः पृथग्ग्रहणात्, प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इत्यनया परिभाषया वा स्वादयः प्रत्ययाः भवन्ति। ततः

प्रथमैकवचनविवक्षायां सुप्रत्यये रमा सु इति जाते उकारस्य उपदेशेऽजनुनासिक इत् इत्यनेन इत्संज्ञा भवति। ततः तस्य लोपः इत्यनेन तस्य लोपे रमा स् इति जायते। अत्र सुप्रत्ययः अनुबन्धविनिर्मुक्तः एकाल् अस्ति। तस्मात् अपृक्त एकाल् प्रत्ययः इति अनेन सूत्रेण सुप्रत्ययावयवस्य सकारस्य अपृक्तसंज्ञा भवति। तदा-

[१३.१] हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्॥ (६.१.६८)

सूत्रार्थः - हलन्तात्परं यौ ङ्यापौ तदन्तात् च परं सुतिसि इत्येतदपृक्तं हल् लुप्यते इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। हल्ङ्याब्भ्यः दीर्घात् सुतिसि अपृक्तं हल् इति सूत्रगतपदच्छेदः। अस्मिन् सूत्रे पञ्चपदानि सन्ति। हल्ङ्याब्भ्यः इति पञ्चमीबहुवचनान्तं पदम्। हल् च ङी च आप् च इति हल्ङ्यापः तेभ्यः हल्ङ्याब्भ्यः इति इतरेतरयोगद्वन्द्वसमासः। अत्र पञ्चमीश्रवणात् तस्मादित्युत्तरस्य इत्यनया परिभाषया परस्य इत्यर्थो लभ्यते। दीर्घात् इति पञ्चम्येकवचनान्तं पदम्। अस्य तु द्विवचनान्ततया विभक्तिविपरिणामः भवति। सुतिसि इति प्रथमैकवचनान्तं पदम्। सुश्च तिश्च सिश्च इति सुतिसि समाहारयोगद्वन्द्वसमासः। अपृक्तम् इति प्रथमैकवचनान्तं पदम्। हल् इत्यपि प्रथमैकवचनान्तं पदम्। लोपो व्योर्वलि इत्यस्मात् सूत्रात् लोपः इति प्रथमान्तं पदम् अनुवर्तते। शब्दस्वरूपेभ्यः इति अध्याहार्यम्। हल्ङ्याब्भ्यः शब्दस्वरूपेभ्यः दीर्घात् परस्य सुतिसि अपृक्तं हल् लोपः इति पदयोजना। शब्दस्वरूपेभ्यः हल्ङ्याब्भ्यः इत्यत्र विशेष्यत्वेन अन्वेति। तेन तदन्तविधिना हलन्तात् ङ्यन्तात् आबन्तात् शब्दस्वरूपात् इति लभ्यते। ङी इत्यनेन ङीप्, ङीष्, ङीन् इत्येतेषां ग्रहणम्। आप् इत्यनेन च टाप्, डाप्, चाप् इत्येतेषां ग्रहणं भवति। दीर्घात् इत्यत्र द्वित्वेऽपि एकवचनम् आर्षम्। दीर्घात् इति ङ्यापोरेव विशेषणम्, न तु हलः, हलः दीर्घाभावत्। दीर्घत्वं तु केवलम् अचः एव भवति। अपृक्तमिति हलिति च सामानाधिकरण्येन अन्वेति। तेन अस्य सूत्रस्य हलन्तात् परं यौ दीर्घौ ङ्यन्ताबन्तौ ताभ्यां परं सुतिसि इत्येतदपृक्तं हल् लुप्यते इति सूत्रार्थः भवति।

उदाहरणम्- रमा।

सूत्रार्थसमन्वयः- रमाशब्दात् प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे रमा स् इति स्थितिः। अत्र रमा इति आबन्तः अस्ति। सुप्रत्ययश्च अपृक्त एकाल्प्रत्ययः इत्यनेन अपृक्तसंज्ञकः। अतः प्रकृतसूत्रेण सुप्रत्ययावयवस्य सकारस्य लोपे रमा इति रूपं सिद्ध्यति। तदा -

[१३.२] प्रत्ययलोपे प्रत्ययलक्षणम्॥ (१.१.६२)

सूत्रार्थः - प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्याद्।

सूत्रव्याख्या- इदं परिभाषासूत्रम्। प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रगतपदच्छेदः। पदद्वयात्मकेऽस्मिन् सूत्रे प्रत्ययलोपे इति सप्तम्येकवचनान्तं पदम्। प्रत्ययस्य लोपः प्रत्ययलोपः इति षष्ठीतत्पुरुषसमासः, तस्मिन् प्रत्ययलोपे। प्रत्ययलक्षणम् इति प्रथमान्तं सुबन्तं पदम्। प्रत्ययो लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणम् इति बहुव्रीहिसमासः। प्रत्ययस्य लोपे सति प्रत्ययनिमित्तं कार्यं स्यादित्यर्थः।

उदाहरणम्- यथा रमा इत्यत्र सुप्रत्यये लुप्ते अपि अनेन सूत्रेण प्रत्ययलक्षणम् आश्रित्य पदसंज्ञा भवति।

[१३.३] औङ आपः॥ (७.१.१८)

सूत्रार्थः - आबन्तादङ्गात् औङः शी भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। औङः आपः इति सूत्रगतपदच्छेदः। अस्मिन् सूत्रे द्वे पदे स्तः। आपः इति पञ्चम्येकवचनान्तं पदम्। आपः इत्यनेन टाप्, चाप्, डाप् इत्येतेषां स्त्रीप्रत्ययानां ग्रहणं भवति। औङः इति षष्ठ्येकवचनान्तं पदम्। अङ्गस्य इत्यधिकृतं पञ्चम्यन्ततया विपरिणम्यते। तच्च आपः इत्यनेन विशेष्यते। तेन तदन्तविधिना आबन्तात् अङ्गात् इत्यर्थो लभ्यते। औङः इति औकारविभक्तेः प्राचां संज्ञा। जशः शी इत्यस्मात् सूत्रात् शी इति प्रथमान्तं पदम् अनुवर्तते। औङ् स्थानी आदेशश्च शी इति। तेन आबन्तात् अङ्गात् परस्य औङः शी इत्यादेशः भवतीति सूत्रार्थो भवति।

उदाहरणम्- रमे।

सूत्रार्थसमन्वयः- रमाशब्दात् प्रथमाद्विवचनविवक्षायाम् औप्रत्यये रमा औ इति जातम्। ततः वृद्धिरेचि इति सूत्रेण वृद्धिः प्राप्ता। तं प्रबाध्य अनेकाल्शित्सर्वस्य इति परिभाषया परिष्कृतेन औङ आपः इति सूत्रेण अङ्गसंज्ञकात् आबन्तात् रमाशब्दात्परस्य औङः स्थाने अनेकाल्त्वात् शी इति सर्वादेशे रमा शी इति भवति। ततः स्थानिवद्भावेन प्रत्ययत्वात् लशक्वतद्धिते इति सूत्रेण तदाद्यस्य शस्य इत्संज्ञायां तस्य लोपः इति लोपे कृते रमा ई इति भवति। ततः आद् गुणः इति सूत्रेण पूर्वपरयोः आकारेकारयोः स्थाने स्थानत आन्तर्यात् एकाररूपगुणैकादेशे सर्वसंयोगे रमे इति रूपं सिद्धम्।

प्रथमाबहुवचने जस्प्रत्यये अनुबन्धलोपे रमा अस् इति जाते प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसवर्णदीर्घः प्राप्तः। ततः दीर्घाज्जसि च इत्यनेन सूत्रेण तस्य बाधे अकः सवर्णे दीर्घः इत्यनेन सर्वणदीर्घे रमास् इति जातम्। ततः सकारस्य रुत्वे विसर्गे च रमाः इति रूपं भवति।

पाठगतप्रश्नाः-१

१. हल्ङ्याब्भ्य...इति सूत्रं पूरयत।

२. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इति सूत्रस्य अर्थं लिखत।

३. औङः आपः इत्यस्य सूत्रस्य अर्थं लिखत।

४. प्रत्ययलोपे प्रत्ययलक्षणम् इति कीदृशं सूत्रम्।

[१३.४] सम्बुद्धौ च॥ (७.३.१०६)

सूत्रार्थः - आपः एकारः स्यात्सम्बुद्धौ इति।

सूत्रव्याख्या- इदं आदेशविधायकसूत्रम्। सम्बुद्धौ च इति सूत्रगतपदच्छेदः। पदद्वयात्मकेऽस्मिन् सूत्रे सम्बुद्धौ इति सप्तम्येकवचनान्तं पदम्। चेति अव्ययपदम्। आङि चापः इत्यस्मात् सूत्रात् आपः इति षष्ठ्येकवचनान्तं पदम् अनुवर्तते। अङ्गस्य इत्यधिकृतम्। अङ्गस्य इति पदम् आपः इत्यस्य विशेषणम्। अतः तदन्तविधिना आबन्तस्य अङ्गस्य इत्यर्थो लभ्यते। बहुवचने झल्येत् इत्यस्मात् सूत्रात् एत् इति प्रथमैकवचनान्तं पदम् अनुवर्तते। आपः इत्यत्र षष्ठीनिर्देशात् अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य अलः स्थाने आदेशः भवति। तेन अस्य सूत्रस्य सम्बुद्धौ परे आपः एकारः भवति इत्यर्थो लभ्यते।

उदाहरणम्- हे रमे।

सूत्रार्थसमन्वयः- रमाशब्दात् सम्बोधनैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे हे रमा स् इति स्थितिः। सुप्रत्ययस्य सम्बुद्धिसंज्ञायां अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन अनेन सूत्रेण आबन्तस्य अन्त्यस्य अलः आकारस्य एकारादेशे हे रमे स् इति जातः। ततः एङ्ह्रस्वात्सम्बुद्धेः इत्यनेन सूत्रेण एङः परस्य सम्बुद्धिलोपे हे रमे इति रूपं सिद्ध्यति।

सम्बोधनद्विवचने औप्रत्यये हे रमा औ इति स्थितिः। ततः औङः श्यादेशे अनुबन्धलोपे रमा ई इति स्थितिः। ततः आद्गुणः इत्यनेन गुणे एकादेशे हे रमे इति रूपं सिद्ध्यति।

बहुवचने जस्प्रत्यये अनुबन्धलोपे रमा अस् इति स्थितिः। ततः सर्वणदीर्घे रुत्वे विसर्गे च हे रमाः इति सिद्ध्यति।

रमाशब्दस्य द्वितीयैकवचने अम्प्रत्यये रमा अम् इति स्थितिः भवति। ततः मकारस्य न विभक्तौ तुस्माः इत्यनेन इत्त्वनिषेधः भवति। ततः रमा अम् इत्यत्र अकः सवर्णे दीर्घः इत्यनेन दीर्घे प्राप्ते तं प्रबाध्य प्रथमयोः पूर्वसवर्णः इत्यनेन सूत्रेण पूर्वसवर्णदीर्घः प्राप्तः। ततः अतो गुणे इत्यनेन गुणे पूर्वरूपैकादेशे रमाम् इति रूपम्।

द्वितीयाद्विवचने च औट्प्रत्यये अनुबन्धलोपे, औङः श्यादेशे अनुबन्धलोपे रमा ई इति स्थितिः। ततः आद्गुणः इत्यनेन गुणे एकादेशे रमे इति रूपं सिद्ध्यति।

द्वितीयाबहुवचने शसि अनुबन्धलोपे रमा अस् इति स्थितिः भवति। ततः प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसर्वणदीर्घे रुत्वे विसर्गे च रमाः इति रूपं सिद्ध्यति। अत्रेदं ध्येयं यद् रमाशब्दः पुंलिङ्गी नास्ति। तेन तस्माच्छसो नः पुंसि इत्यनेन कृतपूर्वसर्वर्णदीर्घात् परस्य शसः सस्य नत्वं न।

[१३.५] आङि चापः॥ (७.३.१०५)

सूत्रार्थः- आङि ओसि च परे आबन्तस्य अङ्गस्य एदादेशः भवति ।

सूत्रव्याख्या- इदं आदेशविधायकसूत्रम्। आङि च आपः इति सूत्रगतपदच्छेदः। पदत्रयात्मकेऽस्मिन् सूत्रे आङि इति सप्तम्येकवचनान्तं पदम्। आङ् इति टासंज्ञा प्राचाम्। ओसि च इत्यस्मात् सूत्रात् ओसि इति सप्तम्यन्तं पदम् अनुवर्तते। चेति अव्ययपदम्। आपः इति षष्ठ्येकवचनान्तं पदम्। अङ्गस्य इत्यधिक्रियते। आपः इति पदम् अङ्गविशेषणम्। तेन तदन्तविधिना आबन्तस्य अङ्गस्य इत्यर्थो लभ्यते। आपः इत्यत्र षष्ठीनिर्देशात् अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य अलः आदेशः भवति

इत्यर्थः लभ्यते। बहुवचने झल्येत् इत्यस्मात् सूत्राद् एदिति प्रथमान्तं पदम् अनुवर्तते। तेन अस्य सूत्रस्य आङि ओसि च परे आबन्तस्य अङ्गस्य एदादेशः भवति इत्यर्थो भवति।

उदाहरणम्- रमया।

सूत्रार्थसमन्वयः- रमाशब्दात् तृतीयैकवचनविवक्षायां टाप्रत्यये अनुबन्धलोपे रमा आ इति स्थितिः। अत्र रमाशब्दः आबन्तः अस्ति। ततः परं च आङस्ति। अतः आङि परे अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन आबन्तस्य अङ्गस्य अन्त्यस्य आकारस्य एदादेशे रमे आ इति स्थितिः। ततः एचोऽयवायावः इत्यनेन सूत्रेण एकारस्य अयादेशे रम् अय् आ इति जातः। ततः वर्णसम्मेलने रमया इति रूपं सिद्ध्यति।

तृतीयाद्विवचने भ्यामि प्रत्यये रमाभ्याम् इति रूपं सिद्ध्यति। बहुवचने च भिस्प्रत्यये सकारस्य रुत्वे विसर्गे च रमाभिः इति रूपम्।

[१३.६] याडापः॥ (७.३.११३)

सूत्रार्थः - आपः परस्य ङिद्विभक्तेः याडागमः स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। याट् आपः इति सूत्रगतपदच्छेदः। पदद्वयात्मकेऽस्मिन् सूत्रे याट् इति प्रथमैकवचनान्तं पदम्। याटि इत्यत्र टकारः इत् अस्ति। अतः आद्यन्तौ टकितौ इति परिभाषया याट् इति आद्यावयवः इति लभ्यते। आपः इति पञ्चम्येकवचनान्तं पदम्। परस्य इत्यध्याहार्यम्। अङ्गस्य इत्यधिक्रियते। अङ्गस्य इति पदं पञ्चम्यन्ततया विपरिणम्यते। ततः आपः इत्यनेन विशेष्यते। तेन तदन्तविधिना आबन्तस्य अङ्गस्य इत्यर्थो लभ्यते। घेर्ङिति इत्यस्मात् ङिति इति सप्तम्येकवचनान्तं पदम्। ङिति इत्यत्र सप्तमी आपः इत्यत्र च पञ्चमी श्रूयते। अतः सप्तमीपञ्चम्योः उभयोः निर्देशः अस्ति। तस्मात् उभयनिर्दशे पञ्चमीनिर्दशो बलीयान् इति न्यायेन तस्मादित्युत्तरस्य इति परिभाषया ङिति इति सप्तम्यन्तं षष्ठ्यन्ततया विपरिणम्यते। ङितः इति षष्ठ्यन्तं पदं लभ्यते। एवम् अस्य सूत्रस्य अर्थः भवति- आपः परस्य ङितः याडागमो भवति इति।

उदाहरणम्- रमायै।

सूत्रार्थसमन्वयः- रमाशब्दात् चतुर्थ्येकवचनविवक्षायां ङेप्रत्यये अनुबन्धलोपे रमा ए इति जातः। अत्र वृद्धौ प्राप्तायां तां बाधित्वा ङेप्रत्ययस्य ङित्वात् याडापः इत्यनेन सूत्रेण आपः परस्य ङितः याडागमे अनुबन्धलोपे रमा या ए इति भवति। ततः वृद्धिरेचि इत्यनेन सूत्रेण वृद्धौ ऐकारे रमायै इति रूपं सिद्ध्यति।

चतुर्थीद्विवचने भ्यामि रमाभ्याम् इति, बहुवचने रमाभ्यः इति रूपं भवति।

पञ्चम्येकवचनविवक्षायां ङसिप्रत्यये अनुबन्धलोपे रमा अस् इति स्थिते याडापः इत्यनेन सूत्रेण आबन्तस्य याडागमे अनुबन्धलोपे रमा या अस् इति भवति। ततः सवर्णदीर्घे रमायास् इति जाते सकारस्य रुत्वे विसर्गे च रमायाः इति रूपम्।

पञ्चमीद्विवचने भ्यामि रमाभ्याम् इति, बहुवचने रमाभ्यः इति रूपं भवति।

षष्ठ्येकवचनविवक्षायां ङस्प्रत्यये अनुबन्धलोपे पञ्चम्येकवचनवत् रमायाः इति रूपं भवति।

षष्ठीद्विवचनविवक्षायाम् ओस्प्रत्यये आङि चापः इत्यनेन सूत्रेण मकारोत्तरस्य आकारस्य एकारादेशे रमे ओस् इति स्थितिः। ततः एचोऽयवायावः इत्यनेन सूत्रेण अयादेशे सकारस्य रुत्वे विसर्गे च रमयोः इति रूपम्।

षष्ठीबहुवचने आम्प्रत्यये ह्रस्वनद्यापो नुट् इत्यनेन सूत्रेण आमः नुडागमे अनुबन्धलोपे नामि इत्यनेन नामि परे दीर्घे नकारस्य णत्वे च रमाणाम् इति रूपम्।

[१३.७] ङेराम्नद्याम्नीभ्यः॥ (७.३.११६)

सूत्रार्थः - नद्यन्ताद् आबन्ताद् नीशब्दाच्च परस्य ङेः आम् भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। ङेः आम् नद्याम्नीभ्यः इति सूत्रगतपदच्छेदः। पदत्रयात्मकेऽस्मिन् सूत्रे ङेरिति षष्ठ्येकवचनान्तं पदम्। ङेरित्यत्र षष्ठीश्रवणात् षष्ठीस्थाने योगा इत्यनया परिभाषया स्थाने पदम् उपतिष्ठते। नद्याम्नीभ्यः इति पञ्चमीबहुवचनान्तं पदम्। नद्याम्नीभ्यः इति पञ्चमीबहुवचनान्तं पदम्। नदी च आप् च नीश्च इति नद्याम्न्यः तेभ्यः नद्याम्नीभ्यः इति इतरेतरद्वन्द्वसमासः। नद्याम्नीभ्यः इत्यत्र पञ्चमीश्रवणात् तस्मादित्युत्तरस्य इति परिभाषया परस्य इति पदं लभ्यते। अङ्गस्य इत्यधिक्रियते। तस्य च पञ्चमीबहुवचनान्ततया विपरिणामः भवति। तेन अङ्गेभ्यः इत्यर्थो लभ्यते। तच्च नद्याम्नीभ्यः इत्यत्र विशेष्यत्वेन अन्वेति। तेन तदन्तविधिना नद्यन्ताद् आबन्तात् नद्यन्तात् चाङ्गात् इत्यर्थो लभ्यते। आम् इति प्रथमैकवचनान्तं पदम्। आमादेशस्य स्थानिवद्भावात् विभक्तित्वात् हलन्त्यम् इत्यनेन प्राप्तस्य इत्त्वस्य न विभक्तौ तुस्माः इत्यनेन निषेधो भवति। तेन अस्य सूत्रस्य नद्यन्तात् आबन्तात् नीशब्दाच्च परस्य ङेरामादेशः भवति इत्यर्थो भवति।

उदाहरणम्- रमायाम्।

सूत्रार्थसमन्वयः- रमाशब्दात् सप्तम्येकवचनविवक्षायां ङिप्रत्यये अनुबन्धलोपे रमा ङि इति स्थितिः। ततः ङेराम्नद्याम्नीभ्यः इत्यनेन सूत्रेण ङेः सर्वादेशे आमि रमा आम् इति स्थितिः भवति। ततः स्थानिवद्भावात् ङितः याडापः इत्यनेन सूत्रेण याडागमे अनुबन्धकार्ये रमा या आम् इति जाते सवर्णदीर्घे रमायाम् इति रूपं सिद्ध्यति।

सप्तमीबहुवचने ओस्प्रत्यये रमयोः इति रूपम्, बहुवचने च सुप्प्रत्यये रमासु इति रूपम्। अत्र इदं धातव्यं यत् इण्कोः परं प्रत्ययावयवः सकारः नास्ति तस्मात् रामेषु इतिवत् रमासु इत्यत्र सकारस्य षत्वं न। दूर्गादीनाम् आकारान्तस्त्रीलिङ्गशब्दानाम् अपि रमाशब्दवद् रूपाणि भवन्ति।

इदानीं स्त्रीलिङ्गवाचकस्य सर्वाशब्दस्य आलोचना प्रारभ्यते। सर्वनामसंज्ञकाद् अदन्तसर्वशब्दात् स्त्रियां टापि सर्वाशब्दः निष्पद्यते। तस्य प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति परिभाषाबलेन सर्वनामसंज्ञकस्य सर्वार्थवाचकस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इत्यनेन प्रातिपदिकसंज्ञा भवति। रमाशब्दात् सर्वाशब्दस्य ङिद्विभक्तिषु आमि च एव भेदः दृश्यते। अन्यत्र सर्वत्र रमाशब्दवत् रूपाणि भवन्ति। ततः प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे रमा स् इति स्थितिः भवति। ततः

एकाल्प्रत्ययस्य सु-इत्यस्य अपृक्त एकाल्प्रत्ययः इत्यनेन अपृक्तसंज्ञा भवति। ततः आबन्तात् परस्य अपृक्तप्रत्ययस्य हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इत्यनेन लोपे रमा इति रूपं भवति।

प्रथमाद्विवचने रमाशब्दवत् सर्वे इति, बहुवचने सर्वाः, द्वितीयैकवचने सर्वाम्, द्विवचने सर्वे, बहुवचने सर्वाः, तृतीयैकवचने सर्वया, द्विवचने सर्वाभ्याम्, बहुवचने सर्वाभिः इति रूपाणि भवन्ति। ङित्सु याडापः इत्यनेन आपः परस्य ङिद्वचनस्य याडागमे प्राप्ते अग्रिमं सूत्रं प्रारभ्यते।

पाठगतप्रश्नाः

५. सम्बुद्धौ च इति सूत्रस्य अर्थं लिखत।
६. सम्बुद्धौ च इत्यनेन सूत्रेण किं विधीयते।
७. आङि चापः इति सूत्रस्य अर्थं लिखत।
८. याडापः इति सूत्रस्य अर्थं लिखत।
९. रमायै इत्यत्र याडागमः केन सूत्रेण।
१०. ङेराम्नद्याम्नीभ्यः इति किं सूत्रम्।

[१३.८] सर्वनाम्नः स्याड्ढ्रस्वश्च॥ (७.३.११४)

सूत्रार्थः- आबन्तात् सर्वनाम्नः परस्य ङितः स्याट् स्यात् आपश्च ह्रस्वः।

सूत्रव्याख्या- इदं विधिसूत्रम्। सर्वनाम्नः स्याट् ह्रस्वः च इति सूत्रगतपदच्छेदः। सूत्रेऽस्मिन् त्रीणि पदानि विद्यन्ते। सर्वनाम्नः इति पञ्चम्येकवचनान्तं पदम्। स्याट् इति प्रथमैकवचनान्तं पदम्। स्याटि टित्करणात् लिङ्गात् तस्य आगमत्वं निश्चीयते। तेन अयम् आगमविधिः। ह्रस्वः इति प्रथमैकवचनान्तं पदम्। चेति अव्ययपदम्। याडापः इत्यस्मात् सूत्रात् आपः इति पञ्चम्येकवचनान्तं पदम् अनुवृत्तं सर्वनाम्नः इत्यत्र विशेष्यत्वेन अन्वेति। तेन तदन्तविधिना आबन्तात् सर्वनाम्नः इत्यर्थो लभ्यते। घेर्ङिति इत्यस्मात् ङिति इति सप्तम्यन्तं पदम् षष्ठ्या विपरिणम्यते। ङितः इत्यत्र षष्ठीश्रवणात् तस्यैव अयम् आद्यवयवः भवति। ह्रस्वनद्यापो नुट् इत्यस्मात् सूत्रात् आपः इति षष्ठ्यन्तं पदं ह्रस्वः इत्यत्र अन्वेति। आपः इत्यत्र षष्ठीश्रवणात् अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य अलः आदेशः स्यादित्यर्थो लभ्यते। तेन अस्य सूत्रस्य आबन्तात् सर्वनाम्नः परस्य ङितः स्याट् स्यात् आपश्च ह्रस्वः भवति इत्यर्थो भवति।

उदाहरणम्- सर्वस्यै।

सूत्रार्थसमन्वयः- सर्वाशब्दात् चतुर्थ्येकवचनविवक्षायां ङेप्रत्यये अनुबन्धलोपे रमा ए इति जाते याडापः इत्यनेन आबन्तात् परस्य ङितः याडागमः प्राप्तः। तं बाधित्वा अनेन सूत्रेण स्याडागमे अनुबन्धलोपे आपः ह्रस्वे च सर्व स्य ए इति स्थितिः भवति। ततः वृद्धिरेचि इत्यनेन सूत्रेण वृद्धिरूपैकादेशे सर्वस्यै इति रूपं सिद्ध्यति।

सर्वाशब्दस्य चतर्थीद्विवचने भ्यामि प्रत्यये सर्वाभ्याम् इति रूपम्। बहुवचने भ्यसि प्रत्यये सर्वाभ्यः इति रूपं भवति।

पञ्चम्येकवचने ङसिप्रत्यये अनुबन्धलोपे राम अस् इति स्थितिः भवति। ततः ङसेः ङित्त्वात् सर्वनाम्नः स्याड्ढ्रस्वश्च इत्यनेन सूत्रेण स्याडागमे आपः ह्रस्वे च सर्वस्या अस् इति स्थितिः भवति। ततः सकारस्य रुत्वे विसर्गे च सर्वस्याः इति रूपं सिद्ध्यति।

द्विवचने भ्याम्प्रत्यये सर्वाभ्याम् इति रूपम्, बहुवचने भ्यस्प्रत्यये च सर्वाभ्यः इति रूपम्।

षष्ठ्येकवचने ङस्प्रत्यये अनुबन्धलोपे सर्वा अस् इत्यत्र ङसः ङित्त्वात् सर्वनाम्नस्याड्ढ्रस्वश्च इत्यनेन सूत्रेण स्याडागमे ह्रस्वे सर्वस्याः इति स्थितिः भवति। ततः सकारस्य रुत्वे विसर्गे च सर्वाभ्यः इति रूपम् सिद्ध्यति।

षष्ठीद्विवचने ओस्प्रत्यये सर्वा ओस् इति जाते आङि चापः इत्यनेन सूत्रेण मकारोत्तरस्य आकारस्य एकारादेशे सर्वे ओस् इति जातः। ततः एचोऽयवायावः इत्यनेन सूत्रेण एयादेशे सकारस्य रुत्वे विसर्गे च सर्वयोः इति रूपम्।

षष्ठीबहुवचने आम्प्रत्यये सर्वा आम् इति स्थितिः भवति। ततः आमि सर्वनाम्नः सुट् इत्यनेन सुडागमे अनुबन्धलोपे सर्वा साम् इति जातः। ततः सर्वासाम् इति रूपं भवति।

सप्तम्येकवचने ङिप्रत्यये ङेराम्नद्याम्नीभ्यः इत्यनेन सूत्रेण ङेरामादेशे सर्वनाम्नः स्याड्ढ्रस्वश्च इत्यनेन सूत्रेण स्याडागमे सर्वासाम् इति रूपं सिद्ध्यति। इति आकारान्तस्त्रीलिङ्गप्रकरणं समाप्तम्।

अथ इकारान्तस्त्रीलिङ्गप्रकरणं प्रारभ्यते।

मन्यते अनया इति विग्रहे मन-ज्ञाने इति धातोः क्तिन्प्रत्यये मतिशब्दः निष्पद्यते। ततः तस्य कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः प्रथमैवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे मति स् इति भवति। ततः सकारस्य रुत्वे विसर्गे च मतिः इति रूपं निष्पद्यते।

मतिशब्दस्य प्रथमाद्विवचने औप्रत्यये मति औ इति स्थितिः भवति। ततः प्रथमयोः पूर्वसवर्णः इत्यनेन सूत्रेण पूर्वसवर्णदीर्घे मती इति रूपं सिद्ध्यति।

प्रथमाबहुवचने जस्प्रत्यये अनुबन्धलोपे मति अस् इति स्थितिः भवति। ततः जसि च इत्यनेन सूत्रेण गुणे मते अस् इति स्थितिः भवति। ततः एचोऽयवायावः इत्यनेन सूत्रेण अयादेशे, सकारस्य रुत्वे विसर्गे च मतयः इति रूपं सिद्ध्यति।

द्वितीयैकवचने अम्प्रत्यये मति अम् इत्यत्र इको यणचि इति गुणः प्राप्तः। तं प्रबाध्य अमि पूर्वः इत्यनेन सूत्रेण पूर्वसवर्णे मतिम् इति रूपं सिद्ध्यति।

द्वितीयाद्विवचने औट्प्रत्यये अनुबन्धलोपे पूर्ववत् मती इति रूपं सिद्ध्यति।

द्वितीयाबहुवचने शस्प्रत्यये अनुबन्धलोपे मति अस् इति स्थितिः भवति। ततः प्रथमयोः पूर्वसवर्णः इत्यनेन सूत्रेण पूर्वसवर्णदीर्घे सकारस्य रुत्वे विसर्गे मतीः इति रूपं सिद्ध्यति। अत्रेदं ध्येयं यत्

अत्र तस्माच्छसो नः पुंसि इत्यनेन सूत्रेण शसः सकारस्य नत्वं न भवति। यतो हि मतिशब्दः स्त्रीलिङ्गे अस्ति न तु पुंलिङ्गे।

तृतीयैकवचने टाप्रत्यये अनुबन्धलोपे मति आ इति स्थितिः भवति। ततः इको यणचि इत्यनेन सूत्रेण यणादेशे मत्या इति रूपं सिद्ध्यति। अत्रेदं ध्येयं यत् अस्त्रियाम् इति निषेधात् आङो नास्त्रियाम् इत्यनेन टाप्रत्ययस्य नादेशो न भवति।

तृतीयाद्विवचने भ्याम्प्रत्यये मतिभ्याम् इति रूपम्, बहुवचने भिस्प्रत्यये मतिभिः इति रूपं सिद्ध्यति।

चतुर्थ्येकवचने ङेप्रत्यये अनुबन्धलोपे मति ए स्थिते मतिशब्दस्य विकल्पेन नदीसंज्ञाविधायकं सूत्रम् उच्यते-

[१३.९] ङिति ह्रस्वश्च॥ (१.४.६)

सूत्रार्थः - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे इति।

सूत्रव्याख्या- इदं संज्ञासूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। ङिति ह्रस्वः च इति सूत्रगदपदच्छेदः। ङिति इति सप्तम्येकवचनान्तं पदम्। ह्रस्वः इति प्रथमैकवचनान्तं पदम्। चेति अव्ययपदम्। अत्र सूत्रे चकारात् वाक्यद्वयं लभ्यते। तत्रादौ ङिति इति प्रथमं वाक्यम्। अत्र नेयङुवङ्स्थानावस्त्री इत्यतः इयङुवङ्स्थानौ इति प्रथमाद्विचनान्तम् अस्त्री इति प्रथमान्तं पदद्वयमनुवर्तते। यू स्त्र्याख्यौ नदी इति सम्पूर्णमपि सूत्रमनुवर्तते। वामि इत्यतः वा इति अव्ययम् अनुवर्तते। स्त्रियामिति अधिक्रियते। ङकार इत् यस्य सः ङित्, तस्मिन् ङिति इत्यत्र परसप्तमी। तेन ङिति परे इत्यर्थलाभः। इयङ् च उवङ् च इति इयङुवङौ, तयोः इयङुवङोः स्थितिः स्थानं ययोः तौ इयङुवङ्स्थानौ। न स्त्री अस्त्री इति नञ्तत्पुरुषसमासः। तस्य च स्त्रीशब्दभिन्नः शब्दः इत्यर्थः। अस्त्रीशब्दः इयङुवङ्स्थानौ इत्यत्र द्विवचनान्ततया अन्वेति। अतः स्त्रीशब्दभिन्नौ शब्दौ इयङुवङ्स्थानौ इत्यर्थः समायाति। यू इति प्रथमाद्विवचनान्तम् पदम्। ईश्च ऊश्च इति यू। दीर्घेकारान्तोकारान्तौ इत्यर्थः। स्त्र्याख्यौ इति प्रथमाद्विवचनान्तं पदम्। स्त्रियामाचक्षते इति स्त्र्याख्यौ नित्यस्त्रीलिङ्गौ इत्यर्थः। नदी इति प्रथमान्तं पदम्। एवञ्चानुवर्तमानानां पदानामन्वयेन इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गौ ईदूतौ शब्दौ स्त्रियां वा नदीसंज्ञौ स्तः ङिति परे इति प्रथमं वाक्यं सिध्यति। ह्रस्वः इति द्वितीयं वाक्यम्। अत्रापि नञ्वर्जं नेयङुवङ्स्थानावस्त्री इति सूत्रमनुवर्तते। यू स्त्र्याख्यौ नदी इति सम्पूर्णमपि सूत्रमनुवर्तते। पूर्ववाक्यात् ङिति सप्तम्यन्तमनुवर्तते। स्त्रियामिति अधिक्रियते। वामि इत्यतः वा इति अनुवर्तते। अत्र सूत्रस्थं ह्रस्व इति पदमनुवर्तमानेन यू इति पदेनान्वेति। तेन ह्रस्वेकारान्तोकारान्तौ इत्यर्थः समायाति। एवञ्च इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गौ ह्रस्वेकारोकारौ शब्दौ स्त्रियां वा नदीसंज्ञौ स्तः ङिति इति द्वितीयं वाक्यं सिद्ध्यति। एवञ्च अस्य सूत्रस्य अर्थः भवति- इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तः ङिति इति।

उदाहरणम्- मतिशब्दात् चतुर्थ्येकवचने ङेप्रत्यये अनुबन्धलोपे मति ए इति स्थितिः भवति। मतिशब्दः ह्रस्वेकारान्तः नित्यस्त्रीलिङ्गी अस्ति। ङिद्विभक्तिः अपि परे अस्ति। अतः अनेन सूत्रेण विकल्पेन स्त्रीलिङ्गवाचकस्य इकारान्तस्य मतिशब्दस्य ङिति प्रत्यये परे नदीसंज्ञा भवति। ततः अग्रिमं सूत्रं प्रवर्तते-

[१३.१०] आण्नद्याः॥ (७.३.११२)

सूत्रार्थः- नद्यन्तात्परेषां ङिताम् आडागमः स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण आडागमः भवति। अस्मिन् सूत्रे द्वे पदे स्तः। आट् नद्याः इति सूत्रगतपदच्छेदः। अत्र सन्धिकार्ये यरोऽनुनासिकेऽनुनासिको वा इत्यनेन सूत्रेण पदान्तस्य यरः टकारस्य अनुनानिके नकारे परे अनुनासिके णकारः अभवत्। आट् इति प्रथमैकवचनान्तं पदम्। नद्याः इति पञ्चम्येकवचनान्तं पदम्। अङ्गस्य इत्यधिक्रियते। तस्य च पञ्चम्यन्ततया विपरिणामः भवति। तच्च नद्याः इत्यत्र विशेष्यत्वेन अन्वेति। तेन तदन्तविधिना नद्यन्तात् अङ्गात् इत्यर्थो लभ्यते। घेर्ङिति इत्यस्मात् सूत्रात् ङिति इति सप्तम्यन्तं पदम् अनुवर्तते। तस्य च षष्ठ्यन्ततया विपरिणामः भवति। आटः इत्यत्र टकारस्य इत्संज्ञा भवति। टित्त्वात् अयम् आगमविधिः इति निश्चीयते। तेन अस्मात् सूत्रात् नद्यन्तात् परेषां ङिताम् आडागमः भवति इत्यर्थो लभ्यते। अयञ्च आडागमः टित्त्वात् आद्यन्तौ टकितौ इति परिभाषया ङितः आद्यावयवः भवति।

उदाहरणम्- मति ए इत्यत्र ङेप्रत्ययः ङित्प्रत्ययः अस्ति। किञ्च मतिशब्दस्य ङिति ह्रस्वश्च इत्यनेन विकल्पेन नदीसंज्ञापक्षे अनेन सूत्रेण आडागमे अनुबन्धलोपे मति आ ए इति स्थितिः भवति। ततः वृद्धिविधायकम् अग्रिमं सूत्रं प्रवर्तते-

पाठगतप्रश्नाः-३

११. सर्वनाम्नः स्याड्ढ्रस्वश्च इति सूत्रस्य अर्थः कः।
१२. सर्वस्यै इत्यस्मिन् स्याडागमः केन सूत्रेण भवति।
१३. नदीसंज्ञाविधायकं सूत्रं किम्।
१४. यू स्त्र्याख्यौ नदी इति सूत्रस्य अर्थः कः।
१५. ङिति ह्रस्वश्च इत्यस्य सूत्रस्य अर्थं लिखत।
१६. नद्यान्तात्परेषां ङिताम् आडागमः केन सूत्रेण भवति।

[१३.११] आटश्च(६.१.९०)

सूत्रार्थः- आटोऽचि परे वृद्धिरेकादेशः स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। नदीसंज्ञकानां शब्दानां ङित्प्रत्यये परे आडागमे अनेन सूत्रेण वृद्धिः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। आटः च इति सूत्रगतपदच्छेदः। आटः इति पञ्चम्येकवचनान्तं पदम्। चेति अव्ययपदम्। अत्र टकारोत्तराद् अकारात्परस्य विसर्गस्य चकारे परे सन्धिकार्ये शकारादेशः अभवत्। आटः इत्यत्र पञ्चमीश्रवणात् तस्मादित्युत्तरस्य इति परिभाषया परस्य इत्यर्थो लभ्यते। इको यणचि इत्यस्मात् सूत्रात् अचि इति सप्तम्येकवचनान्तं पदम् अनुवर्तते। अच् इति प्रत्याहारः स्वरवर्णानां बोधकः। अचि इत्यत्र सप्तमीनिर्देशाद् तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषया अचि परे पूर्वस्य कार्यम् इत्यर्थः लभ्यते। वृद्धिरेचि इत्यस्मात् सूत्रात् वृद्धिः इति प्रथमैकवचनान्तं पदम् अनुवर्तते। एकः पूर्वपरयोः इत्यस्मिन् अधिकारे सूत्रमिदं विद्यते। तेन अस्य सूत्रस्य आटः अचि प्रत्याहारे परे पूर्वपरयोः स्थाने वृद्धिरेकादेशः भवति इत्यर्थो भतति।

उदाहरणम्- मत्यै।

सूत्रार्थसमन्वयः- मति आ ए इत्यत्र आटः अचि परे अकारैकारयोः वृद्धिरेकादेशे मति ऐ इति भवति। ततः इको यणचि इत्यनेन सूत्रेण यणादेशे मत्यै इति रूपं सिद्ध्यति।

नदीसंज्ञायाः अभावे घिसंज्ञायां मति ए इत्यत्र घेर्ङिति इत्यनेन सूत्रेण गुणे मते ए इति भवति। ततः एचोऽयवायावः इत्यनेन सूत्रेण अयादेशे मतये इति रूपं सिद्ध्यति।

चतुर्थीद्विवचने भ्याम्प्रत्यये मतिभ्याम् इति रूपम्, बहुवचने भ्यस्प्रत्यये मतिभ्यः इति रूपं सिद्ध्यति।

पञ्चम्येकवचने ङसिप्रत्यये अनुबन्धलोपे मति अस् इत्यत्र ङित्त्वात् विकल्पेन ङिति ह्रस्वश्च इत्यनेन सूत्रेण नदीसंज्ञा भवति। नदीसंज्ञायाम् आण्नद्याः इत्यनेन आडागमे अनुबन्धलोपे मति आ अस् इति स्थितिः भवति। ततः आटश्च इत्यनेन वृद्धौ मति ऐस् इति स्थितिः भवति। ततः यणादेशे, सकारस्य रुत्वे विसर्गे च मत्याः इति रूपं सिद्ध्यति। नदीसंज्ञायाः अभावे मति अस् इत्यत्र घेर्ङिति इत्यनेन गुणे मते अस् इति स्थितिः भवति। ततः ङसिङसोश्च इत्यनेन सूत्रेण पूर्वरूपैकादेशे, सकारस्य रुत्वे विसर्गे च मतेः इति रूपं सिद्ध्यति।

द्विचवने भ्याम्प्रत्यये मतिभ्याम् इति रूपम्, बहुवचने भ्यस्प्रत्यये मतिभ्यः इति रूपं सिद्ध्यति।

षष्ठ्येकवचने नदीत्वपक्षे ङस्प्रत्यये अनुबन्धलोपे आडागमे, वृद्ध्येकादेशे पूर्ववत् मत्याः इति रूपं सिद्ध्यति। नदीसंज्ञायाः अभावे पञ्चम्येकवचनवत् मतेः इति रूपं भवति।

षष्ठीद्विवचने ओस्प्रत्यये मति ओस् इत्यत्र यणादेशे सकारस्य रुत्वे विसर्गे च मत्योः इति रूपं सिद्ध्यति।

षष्ठीबहुवचने आम्प्रत्यये मति आम् इति स्थितिः भवति। ततः ह्रस्वनद्यापो नुट् इत्यनेन सूत्रेण नुडागमे नामि इत्यनेन दीर्घे च मतीनाम् इति रूपं सिद्ध्यति।

[१३.१२] इदुद्भ्याम्॥ (७.३.११७)

सूत्रार्थः- नदीसंज्ञाकाभ्याम् इदुद्भ्यां परस्य ङेराम् स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे इदुद्भ्याम् इति पञ्चमीद्विवचनान्तम् एकमेव पदं विद्यते। इच्च उच्च इति इदुतौ इतरेतरद्वन्द्वसमासः, ताभ्याम् इति इदुद्भ्याम् इति। ङेराम्नद्याम्नीभ्यः इत्यस्मात् सूत्रात् नदीभ्याम् इति पञ्चम्यन्तं, ङेः इति षष्ठ्यन्तं पदम्, आम् इति प्रथमान्तं पदञ्च अनुवर्तते। नदीभ्याम् इत्यस्य द्विवचनान्ततया विभक्तिविपरिणामः भवति। तेन अस्य सूत्रस्य नदीसंज्ञाकाभ्याम् ह्रस्वेकारोकाराभ्यां परस्य परस्य ङेः आमादेशः भवति इति अर्थः भवति।

उदाहरणम्- मत्याम्।

सूत्रार्थसमन्वयः- मतिशब्दात् सप्तम्येकवचने ङिप्रत्यये अनुबन्धलोपे मति इ इति भवति। ततः औदादेशं प्रबाध्य अनेन सूत्रेण ङेः आमादेशे मति आम् इति भवति। ततः आण्नद्याः आटि अनुबन्धलोपे मति आ आम् इति स्थितिः भवति। ततः आटश्चेति सूत्रेण वृद्धौ एकादेशे च मति आम् इति स्थितिः भवति। ततः इको यणचि इति सूत्रेण इकारस्य स्थाने यकारादेशे मत्याम् इति रूपं सिद्ध्यति।

ङिति ह्रस्वश्च इत्यनेन नदीसंज्ञायाः विकल्पेन पक्षे शेषो घ्यसखि इत्यनेन मतिशब्दस्य घिसंज्ञा भवति। ततः अच्च घेः इति सूत्रेण ङेः स्थाने औकारादेशे समं च घेः अन्त्यस्याचः इकारस्य स्थाने अकारे च कृते मत औ इति स्थतिः भवति। ततः वृद्धिरेचि इति सूत्रेण अकारौकारयोः वृद्धौ एकादेशे मतौ इत्यपि रूपं सिद्ध्यति।

सप्तमीद्विचवने ओस्प्रत्यये च पूर्ववत् मत्योः इति रूपम्। बहुवचने सुप्प्रत्यये अनुबन्धलोपे सकारस्य आदेशप्रत्यययोः इत्यनेन षत्वे च मतिषु इति रूपं सिद्ध्यति। अथ ईदन्तशब्दाः।

गौरशब्दात् स्त्रीत्वविवक्षायां षिद्गौरादिभ्यश्च इत्यनेन सूत्रेण ङीष्प्रत्यये अनुबन्धलोपे गौर ई इति भवति। ततः यचि भम् इत्यनेन सूत्रेण भसंज्ञा भवति। भसंज्ञकस्य गौरशब्दस्य यस्येति च इत्यनेन सूत्रेण अकारस्य लोपे गौरी इति शब्दः निष्पद्यते। अव्युत्पन्नस्य पार्वत्यर्थवाचकस्य गौरीशब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इत्यनेन सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे गौरी स् इति स्थितिः भवति। ततः हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हल् इत्यनेन सूत्रेण हलः सकारस्य लोपे गौरी इति रूपं सिद्ध्यति।

प्रथमाद्विवचने औप्रत्यये गौरी औ इति स्थितिः भवति। ततः प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसवर्णदीर्घः प्राप्तः। तस्य दीर्घाज्जसि च इत्यनेन सूत्रेण निषेधः भवति। ततः इको यणचि इत्यनेन सूत्रेण यणादेशे गौर्यौ इति रूपं सिद्ध्यति।

बहुवचने जस्प्रत्यये अनुबन्धलोपे गौरी अस् इति स्थितिः भवति। ततः पूर्ववत् सवर्णदीर्घस्य निषेधः भवति। ततः इको यणचि इत्यनेन यणादेशे सकारस्य रुत्वे विसर्गे च गौर्यः इति रूपं सिद्ध्यति।

गौरीशब्दस्य सम्बोधनैकवचने सुप्रत्यये हे गौरी सु इति स्थितिः भवति। ततः अग्रिमं सूत्रं प्रारभ्यते।

[१३.१३] अम्बार्थनद्योर्ह्रस्वः (७.३.१०७)

सूत्रार्थः- अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बुद्धौ इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अम्बार्थनद्योः ह्रस्वः इति सूत्रगतपदच्छेदः। अस्मिन् सूत्रे द्वे पदे स्तः। अम्बार्थनद्योः इति षष्ठीद्विवचनान्तं पदम्। अम्बा अर्थो यस्य सः इति अम्बार्थः, बहुव्रीहिसमासः। अम्बार्थशब्देन अम्बाशब्दस्य पर्यायशब्दाः अपि गृह्यन्ते। अम्बार्थश्च नदी च इति अम्बार्थनद्यौ, तयोः इति अम्बार्थनद्योः इतरेतरद्वन्द्वसमासः। अङ्गस्य इत्यधिक्रियते। तच्च वचनविपरिणामेन अम्बार्थनद्योः इत्यत्र विशेष्यत्वेन अन्वेति। तेन तदन्तविधिना अम्बार्थनद्यन्तयोः अङ्गयोः इत्यर्थः लभ्यते। ह्रस्वः इति प्रथमैकवचनान्तं पदम्। सम्बुद्धौ च इत्यस्मात् सूत्रात् सम्बुद्धौ इति सप्तम्यन्तं पदम् अनुवर्तते। सम्बुद्धौ इत्यत्र सप्तमीश्रवणात् तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यनया परिभाषया परे इत्यर्थः लभ्यते। तेन अस्य सूत्रस्य अम्बार्थवाचकानां नद्यन्तानां च शब्दानां सम्बुद्धौ परे ह्रस्वः भवति इत्यर्थो भवति।

उदाहरणम्- हे गौरि।

सूत्रार्थसमन्वयः- गौरीशब्दात् सम्बोधने सुप्रत्यये अनुबन्धलोपे हे गौरी स् इति स्थितिः भवति। ईकारान्तगौरीशब्दः नित्यं स्त्रीत्ववाचकः । तेन यू स्त्र्याख्यौ नदी इत्यनेन सूत्रेण तस्य नदी संज्ञा भवति। ततः अनेन सूत्रेण सम्बुद्धौ परे नद्यन्तस्य गौरीशब्दस्य ईकारस्य ह्रस्वे इकारे हे गौरि स् इति स्थितिः भवति। ततः एङ्ह्रस्वात्सम्बुद्धेः इत्यनेन सूत्रेण सकारस्य लोपे हे गौरि इति रूपं भवति।

सम्बोधनद्विवचने औप्रत्यये पूर्ववत् हे गौर्यौ इति रूपं भवति। बहुवचने जस्प्रत्यये अनुबन्धलोपे हे गौर्यः इति रूपं भवति।

द्वितीयैकवचने अम्प्रत्यये गौरी अम् इति जाते अमि पूर्वः इत्यनेन पूर्वरूपैकादेशे गौरीम् इति रूपं भवति। द्विवचने औट्प्रत्यये अनुबन्धलोपे पूर्ववत् गौर्यौ इति रूपं भवति। बहुवचने शस्प्रत्यये अनुबन्धलोपे प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसवर्णदीर्घे सकारस्य रुत्वे विसर्गे च गौरीः इति रूपं भवति।

तृतीयैकवचने टाप्रत्यये अनुबन्धलोपे गौरी आ इति स्थितिः भवति। ततः यणादेशे गौर्या इति रूपं भवति। द्विवचने भ्याम्प्रत्यये गौरीभ्याम् इति रूपं भवति। बहुवचने भिस्प्रत्यये सकारस्य रुत्वे विसर्गे गौरीभिः इति रूपं भवति।

चतुर्थ्येकवचने ङेप्रत्यये अनुबन्धलोपे गौरी ए इति स्थितिः भवति। ततः नदीसंज्ञायां आण्नद्याः इत्यनेन आडागमे आटश्च इत्यनेन बृद्धौ गौरी ऐ इति स्थितिः भवति। ततः यणादेशे गौर्यै इति रूपं भवति। द्विवचने भ्याम्प्रत्यये गौरीभ्याम् इति रूपं भवति। बहुवचने भ्यस्प्रत्यये सकारस्य रुत्वे विसर्गे च गौरीभ्यः इति रूपं भवति।

पञ्चम्येकवचने ङसिप्रत्यये अनुबन्धलोपे गौरी अस् इति स्थितिः भवति। ततः नदीसंज्ञायाम् आडागमे बृद्धौ च पूर्ववत् गौर्याः इति रूपं, द्विवचने भ्याम्प्रत्यये गौरीभ्याम् इति रूपं भवति। बहुवचने भ्यस्प्रत्यये सकारस्य रुत्वे विसर्गे च गौरीभ्यः इति रूपं भवति।

षष्ठ्येकवचने ङस्प्रत्यये गौरीशब्दस्य नदीसंज्ञायाम् आडागमे बृद्धौ च पूर्ववत् गौर्याः इति रूपम्। द्विवचने ओस्प्रत्यये यणादेशे गौर्योः इति रूपं बहुवचने आम्प्रत्यये गौरी आम् इति स्थितिः भवति। ततः नदीसंज्ञायां ह्रस्वनद्यापो नुट् इत्यनेन सूत्रेण नुडागमे नामि इत्यनेन दीर्घे नकारस्य णत्वे च गौरीणाम् इति रूपं भवति।

सप्तम्येकवचने ङिप्रत्यये अनुबन्धलोपे गौरी इ इति स्थितिः भवति। ततः नदीसंज्ञायां ङेराम्नद्याम्नीभ्यः इत्यनेन सूत्रेण ङेरामादेशे गौरी आम् इति स्थितिः भवति। ततः आडागमे बृद्धौ च गौरी आम् इति स्थितिः भवति। ततः यणादेशे गौर्याम् इति रूपं सिद्ध्यति।

द्विवचने ओस्प्रत्यये गौर्योः इति बहुवचने सुप्रत्यये गौरीषु इति रूपं भवति।

पाठगतप्रश्नाः-३

१७. आटश्च इति सूत्रस्य अर्थं लिखत।

१८. आटश्च सूत्रेण किं विधीयते।

१९. इदुद्भ्याम् इति सूत्रस्य अर्थं लिखत।

२०. हे गौरि इत्यत्र ह्रस्वः केन सूत्रेण भवति।

पाठसारः

अजन्तस्त्रीलिङ्गशब्दानां रूपाणि कथं भवन्ति इति अस्मिन् पाठे दर्शितम्। अकारान्तः स्त्रीलिङ्गशब्दः नास्ति तस्मात् वर्णक्रमानुसारेण आदौ आकान्तस्य रमाशब्दस्य रूपाणि कथं भवन्तीति आलोचितम्। ततः नित्यस्त्रीलिङ्गवाचकानां ईकारान्तोकारान्तशब्दानां नदीसंज्ञा भवति इति विस्तरेण आलोचितम्। इकारान्तोकारान्तानां स्त्रीलिङ्गवाचकानां शब्दानां ङित्प्रत्ययेषु विकल्पेन नदीसंज्ञा भवति। तेन तेषु स्थलेषु विकल्पेन रूपाणि भवन्ति इति अस्मिन् पाठे विस्तरशः पर्यालोचितम्।

पाठान्तप्रश्नाः

१. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इति सूत्रं व्याख्यात।

२. प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रं व्याख्यात।

३. सम्बुद्धौ च इति सूत्रं व्याख्यात।

४. आङि चापः इति सूत्रं व्याख्यात।

५. सर्वनाम्नः स्याड्ढ्रस्वश्च इति सूत्रं व्याख्यात।

६. यू स्त्र्याख्यौ नदी इति सूत्रं व्याख्यात।

७. ङिति ह्रस्वश्च इति सूत्रं व्याख्यात।

८. इदुद्भ्याम् इति सूत्रं सोदाहरणं व्याख्यात।

९. अम्बार्थनद्योर्ह्रस्वः इति सूत्रं व्याख्यात।

१०. प्रदत्तानि रूपाणि ससूत्रं साधयत – रमा रमे रमया रमायै रमायाम् मत्याम् गौरि

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्।

२. हलन्तात्परं यौ ङ्यापौ तदन्ताच्च परं सुतिसि इत्येतदपृक्तं हल् लुप्यते इति।

३. आबन्तादङ्गात् औङः शी स्याद्।

४. परिभाषासूत्रम्।

उत्तराणि-२

५. आपः एकारः स्यात्सम्बुद्धौ इति।

६. सम्बुद्धौ प्रत्यये परे आपः एकारादेशः विधीयते।

७. आङि ओसि च परे आबन्तस्य अङ्गस्य एदादेशः स्याद्।

८. आपः परस्य ङिद्वचनस्य याडागमः स्याद्।

९. याडापः इत्यनेन सूत्रेण।

१०. विधिसूत्रम्।

उत्तराणि-२

११. आबन्तात् सर्वनाम्नः परस्य ङितः स्याट् स्यात् आपश्च ह्रस्वः स्याद्।

१२. सर्वनाम्नः स्याड्ढ्रस्वश्च इत्यनेन सूत्रेण।

१३. यू स्त्र्याख्यौ नदी।

१४. ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः इति।

१५. इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे इति।

१६. आण्नद्याः इत्यनेन सूत्रेण।

उत्तराणि-३

१७. आटोऽचि परे वृद्धिरेकादेशः स्याद्।

१८. आटः अचि प्रत्यये परे पूर्वपरयोः स्थाने वृद्ध्येकादेशः विधीयते।

१९. नदीसंज्ञाकाभ्याम् इदुद्भ्यां परस्य ङेराम् स्याद्।

२०. अम्बार्थनद्योर्ह्रस्वः इत्येनन सूत्रेण।

।।इति त्रयोदशः पाठः।।